अरुणाचलाष्टकं

अरुणाचलाष्टकं

दर्शनादभ्रसदसि जननात्कमलालये |
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले || 1 ||

करुणापूरितापांगं शरणागतवत्सलं |
तरुणेंदुजटामौलिं स्मरणादरुणाचलं || 2 ||

समस्तजगदाधारं सच्चिदानंदविग्रहं |
सहस्ररथसोपेतं स्मरणादरुणाचलं || 3 ||

कांचनप्रतिमाभासं वांछितार्थफलप्रदं |
मां च रक्ष सुराध्यक्षं स्मरणादरुणाचलं || 4 ||

बद्धचंद्रजटाजूटमर्धनारीकलेबरं |
वर्धमानदयांभोधिं स्मरणादरुणाचलं || 5 ||

कांचनप्रतिमाभासं सूर्यकोटिसमप्रभं |
बद्धव्याघ्रपुरीध्यानं स्मरणादरुणाचलं || 6 ||

शिक्षयाखिलदेवारि भक्षितक्ष्वेलकंधरं |
रक्षयाखिलभक्तानां स्मरणादरुणाचलं || 7 ||

अष्टभूतिसमायुक्तमिष्टकामफलप्रदं |
शिष्टभक्तिसमायुक्तान् स्मरणादरुणाचलं || 8 ||

विनायकसुराध्यक्षं विष्णुब्रह्मेंद्रसेवितं |
विमलारुणपादाब्जं स्मरणादरुणाचलं || 9 ||

मंदारमल्लिकाजातिकुंदचंपकपंकजैः |
इंद्रादिपूजितां देवीं स्मरणादरुणाचलं || 10 ||

संपत्करं पार्वतीशं सूर्यचंद्राग्निलोचनं |
मंदस्मितमुखांभोजं स्मरणादरुणाचलं || 11 ||

इति श्रीअरुणाचलाष्टकं ||